# यूरोप–वासिनां दृष्ट्यामष्टादश–शताब्दद्याः भारते ज्ञानं विज्ञानं कला च''

**डॉ. आकाँक्षा शर्मा बाजपेयी**

प्राचीन–भारतीय–वैज्ञानिक–पैतृकधनस्यैकोबहुमूल्यकैतिहासिकोऽभिलेखोऽस्ति।अस्याभिलेखस्यावलोकनोपरान्ते तु भवता अयं विश्वासः कर्त्तव्यो भविष्यति यद् भारते टीकाकरणस्य पद्धत्या इतिहासोऽद्यारम्भ न्यूनातिन्यूनः पञ्चाशतवर्षाणि प्राचीनोऽस्ति।

षोडश–शताब्द्यां शीतलायाः निवारणाय प्रायशः सम्पूर्णभारते सुस्थापितायाः टीकाकरणस्य पद्धत्याः तदा यूरोपदेशाः सम्पूर्णतया अनभिज्ञा आसन्। अविश्वसनीयस्येव प्रतीयतस्यास्य सत्यस्यानावरणं बहूनां यूरोपीयानां तैरनेकैः पत्रैः भवति ये यूरोपीयाः विभिन्न–कार्येभ्यस्तत्कालीनभारते कस्मैचित् समयाय आगत्यावसन्। सन् 1720 ईस्वीतः पूर्वं यावत् सम्पूर्णेव यूरोपः टीकाकरणं नाजानत्। तदा शीतलैका प्राणधातकरोगस्य रूपे कुख्याता आसीत्। भारतम् आवकेषु यूरोपीयेषु इमं (रोगं) प्रति अधिकं भयं व्याप्तमासीत् यत्किं यूरोपीयेषु भारतीयानामपेक्षा शीतलायाः कारणेन भवितव्यः मृत्यु–क्रमोऽधिक आसीत्। यूरोपीयैरेकत्रितायाः अभिज्ञताया अनुसारं टीकाकरणेन भारतस्य ब्राहमणैः शीतलायां प्रायशः विजयः प्राप्तः। तैः कृतेषु टीकाकरणेष्वसफलतायाः क्रमः दक्षलक्ष–टीकाकरणेषु मात्रैका आसीत्।